"भागैकं निम्बुजं तीव्रं षड्भागं शर्करोदकम् ।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥
निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥"
इति राजनिर्घण्टः ॥

नियतः, त्रि, ( नि + यम + क्तः । ) संयतः । यथा,
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां नराधिप ! ।
पुष्पाहारो वर्षमेकं तत्रैव नियतात्मवान् ॥"
इति भविष्यपुराणे द्वितीयकल्पः ॥
( सेवापरः । यथा, रामायणे । १ । २ । ७ ।
"प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥")
नित्यः । यथा,—
"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता ।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम् ॥"
इति भाषापरिच्छेदे । १६ ॥
( यथा च कश्चित् ।
"चन्द्रे लक्ष्मीः प्रभा सूर्य्ये गतिर्वायौ भुवि क्षमा ।
एतत्तु नियतं सर्व्वं त्वयि चानुत्तमं यशः ॥"
निपूर्व्वयमधातोर्बह्वर्थकत्वात् बद्धोऽपि । यथा,
नियताञ्जलिः ॥ संयुक्तः । वा आसक्तः । यथा,
महाभारते । १ । १३४ । ५६ ।
"प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा ॥")

नियतिः, स्त्री, (नियम्यते आत्मा अनयेति । नि +
यम + करणे क्तिन् । ) भाग्यम् । दैवम् । इत्य-
मरः ।१।४।२८॥ ( यथा, माघे । ४ । ३४ ।
"आसादितस्य तमसा नियतेर्नियोगा-
दाकाङ्क्षतः पुनरपक्रमणेन कालम् ॥")
नियमः । इति मेदिनी । ते, १२० ॥ ( चतु-
र्द्दशधारिणीदेवयोषिद्गणानामन्यतमा । इति
वह्निपुराणे गणभेदनामाध्यायः ॥ )

नियती, स्त्री, (नियम्यते कालो यया । नि + यम +
क्तिच् । वा ङीष् । ) दुर्गा । यथा,—
"स्तुतिः संस्मरणाद्देवी नियती च नियामता ॥"
इति देवीपुराणे निरुक्ताध्यायः ॥

नियतेन्द्रियः, त्रि, (नियतानि संयतानि इन्द्रियाणि
येन ।) संयतेन्द्रियः । इन्द्रियदमनशीलः । यथा,
मार्कण्डेये । ८४ । ८ ।
"अध्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥"

नियन्ता, [ ऋ ] पुं, ( नियच्छति अश्वादीनिति ।
नि + यम + तृच् । ) सारथिः । इत्यमरः । २ ।
८ । ५६ ॥ ( यथा, महाभारते । ७ । १३ । २२ ।
"स नियन्तृध्वजरथं विव्याध निशितैः शरैः ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । १०५ ।
"अपराजितः सर्व्वसहो नियन्ता नियमो
यमः ॥")
त्रि, शास्ता । यथा, रघुः । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥"

नियन्त्रितः, त्रि, ( नि + यन्त्रि + क्तः । ) अबाधः ।
अनर्गलः । इति हेमचन्द्रः ॥ ( यथा, देवी-
भागवते । २ । ६ । ५२ ।
"आगच्छेत् मर्त्त्यया सो वै मम पार्श्वे नियन्त्रितः ॥")

नियमः, पुं, ( नियमनमिति । नि + यम + "यमः
समुपनिविषु च ।" ३ । ३ । ६३ । इति अप् । )
शौचं सन्तोषः तपः स्वाध्यायः ईश्वरप्रणिधानञ्च ।
इति वेदान्तसारः ॥ प्रतिज्ञा । अङ्गीकार इति
यावत् । व्रतम् । तच्चोपवासादि । अनित्यमागन्तु-
साधनं कर्म्म । इत्यमरः ।२।७।३८ ॥ (सङ्कल्पः ।
यथा, देवीभागवते । ३ । २६ । २५ ।
"नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत् ॥"
बन्धनम् । यथा, मनुः । ८ । १२२ ।
"धर्म्मस्याव्यभिचारार्थमधर्म्मनियमाय च ॥")
मल्लया । निश्चयः । इति मेदिनी । मे, ४६ ॥ * ॥
"नियमाः पञ्च सत्याद्या बाह्याभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्नानमौनोपवासेज्याखाध्यायोपस्थनिग्रहः ।
तपः क्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः ॥
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम् ।
सन्तोषस्तपसां जप्यं वासुदेवार्च्चनं दमः ॥"
इति गरुड़पुराणम् ॥
"ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ।
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥
"तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम् ।
सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च जपो हुतम् ।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः ॥"
इति तन्त्रसारे ( हठयोगप्रदीपिकायाञ्च । १ ।
१७ ॥ कवितानियमाः । यथा,—
"वर्णयेन्न सदप्येतन्नियमोऽथ प्रदर्श्यते ।
भूर्ज्जत्वग्धिमवत्येव मलये ह्येव चन्दनम् ॥
सामान्यवर्णने शौक्ल्यं कृष्णाभ्रःपुण्यवाससाम् ।
कृष्णत्वं केशकाकादिपयोनिधिपयोमुचाम् ॥
रक्तत्वं रत्नबन्धूकविद्रुमाम्भोजविद्युताम् ।
तथा वसन्त एवान्यपुरागां कलकूजितम् ॥
वर्षास्वेव मयूराणां रुतं नृत्यञ्च वर्णयेत् ।
नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते ॥
कमलासम्पदोः क्षयाहरितोर्नागसर्पयोः ।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ॥
चन्द्रेशशैलयोः कामध्वजे मकरमत्स्ययोः ।
दानवासुरदैत्यानामैक्यमेवाभिसम्मतम् ॥
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता ।
भानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥"
इति कविकल्पलतायाम् १ स्तवके वर्ण्यस्थिति-
र्नाम तृतीयं कुसुमम् ॥ ( विष्णुः । यथा, महा-
भारते । १३ । १४९ । ३० ।
"अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥"
महादेवः । यथा, तत्रैव तस्य सहस्रनाम-
कीर्त्तने । १३ । १७ । ३५ ।
"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः ॥")

नियमनं, क्ली, (नि + यम + भावे ल्युट् ।) नियमः ।
यथा । "न तत्राभिधानियमनात्सत्याः ।" इति
काव्यप्रकाशे द्वितीयोल्लासः ॥ बन्धनम् । यथा ।
बलेर्नियमनमिलुद्धटः ॥ ( निग्रहः । यथा,
रघुः । ६ । ६ ।
"समतया वसुवृष्टिविसर्ज्जनै-
र्नियमनादसताञ्च नराधिपः ॥"
नियच्छतीति । नि + यम + ल्युः । नियामके,
त्रि । यथा, हरिवंशे । १८१ । ५३ ।
"इन्द्रयज्ञविनाशाय बलेर्नियमनाय च ॥" )

नियमसेवा, स्त्री, ( नियमेन भगवतः सेवा । )
कार्त्तिकमासे नियमपूर्व्वकभगवदाराधना । यथा,
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः ।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद ! ॥"
किञ्च ।
"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ! ।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः ॥"
तत्रोपक्रमकालश्चोक्तः श्रीकृष्णसत्यासंवादीय-
कार्त्तिकमाहात्म्ये ।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥ अन्यत्
कार्त्तिकशब्दे द्रष्टव्यम् ॥

नियमितः, त्रि, (नि + यम + णिच् + क्तः ।) कृत-
नियमः । बद्धः । यथा,—
"क्षुद्राः सन्त्रासमेते विजहतु हरयः क्षुण्णशक्रेभ-
कुम्भा
युष्मद्देहेषु लज्जां दधति परममी शायका निष्प-
तन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं
मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वे-
षयामि ॥"
इति महानाटकम् ॥

नियातनं, क्ली, ( नि + यत + णिच् + ल्युट् । )
निपातनम् । इत्यमरटीकायां नयनानन्दः ॥

नियामः, पुं, ( नि + यम + पक्षे घञ् ।) नियमः ।
इति शब्दरत्नावली ॥

नियामकः, पुं, (नियामयतीति । नि + यम + णिच्
+ ण्वुल् ।) पोतवाहः । इत्यमरः । १ ।१०।१२॥
त्रि, । नियन्ता । इति मेदिनी । के, १६४ ॥
( यथा, महाभारते । ३ । २०१ । ३४ ।
"ततोऽग्निं नाशयामासुः सर्व्वशो मिनिया-
मकाः ॥" )

नियुक्तः, त्रि, (नि + युज + क्तः ।) नियोगविशिष्टः ।
( यथा, मनुः । ६ । ६० ।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ॥" )
अवधारितः । आज्ञप्तः । यथा,—
"जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदिस्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥"
इत्याह्निकतत्त्वम् ॥